श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ विंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ विंशः सर्गः ॥

## शार्दूलप्रेरणया रावणेन शुकं दूतीकृत्य तद्द्वारा सुग्रीवसविधे सन्देशस्य प्रेषणम्, तत्र वानरकृता तदीया दुरवस्था, श्रीरामस्यानुग्रहेण तस्य क्लेशतो मोक्षणं सुग्रीवेण च रावणं प्रत्युत्तरदानम्

ततो निविष्टां ध्वजिनीं सुग्रीवेणाभिपालिताम्।
ददर्श राक्षसोऽभ्येत्य शार्दूलो नाम वीर्यवान्॥ **6.20.1** ॥

चारो राक्षसराजस्य रावणस्य दुरात्मनः।
तां दृष्ट्वा सर्वतोऽव्यग्रां प्रतिगम्य स राक्षसः॥ **6.20.2** ॥

आविश्य लङ्कां वेगेन राजानमिदमब्रवीत्।
एष वै वानरर्क्षौघो लङ्कां समभिवर्तते॥ **6.20.3** ॥

अगाधश्चाप्रमेयश्च द्वितीय इव सागरः।
पुत्रौ दशरथस्येमौ भ्रातरौ रामलक्ष्मणौ॥ **6.20.4** ॥

उत्तमौ रूपसम्पन्नौ सीतायाः पदमागतौ।
एतौ सागरमासाद्य सन्निविष्टौ महाद्युते॥ **6.20.5** ॥

बलं चाकाशमावृत्य सर्वतो दशयोजनम्।
तत्त्वभूतं महाराज क्षिप्रं वेदितुमर्हसि॥ **6.20.6** ॥

तव दूता महाराज क्षिप्रमर्हन्ति वेदितुम्।
उपप्रदानं सान्त्वं वा भेदो वात्र प्रयुज्यताम्॥ **6.20.7** ॥

शार्दूलस्य वचः श्रुत्वा रावणो राक्षसेश्वरः।
उवाच सहसा व्यग्रः सम्प्रधार्यार्थमात्मनः।
शुकं साधु तदा रक्षो वाक्यमर्थविदां वरम्॥ **6.20.8** ॥

सुग्रीवं ब्रूहि गत्वाऽऽशु राजानं वचनान्मम।
यथासन्देशमक्लीबं श्लक्ष्णया परया गिरा॥ **6.20.9** ॥

त्वं वै महाराजकुलप्रसूतो
    महाबलश्चर्क्षरजःसुतश्च।
न कश्चनार्थस्तव नास्त्यनर्थ -
    स्तथापि मे भ्रातृसमो हरीश॥ **6.20.10** ॥

अहं यद्यहरं भार्यां राजपुत्रस्य धीमतः।
किं तत्र तव सुग्रीव किष्किन्धां प्रति गम्यताम्॥ **6.20.11** ॥

नहीयं हरिभिर्लङ्का प्राप्तुं शक्या कथञ्चन।
देवैरपि सगन्धर्वैः किं पुनर्नरवानरैः॥ **6.20.12** ॥

स तदा राक्षसेन्द्रेण सन्दिष्टो रजनीचरः।
शुको विहङ्गमो भूत्वा तूर्णमाप्लुत्य चाम्बरम्॥ **6.20.13** ॥

स गत्वा दूरमध्वानमुपर्युपरि सागरम्।
संस्थितो ह्यम्बरे वाक्यं सुग्रीवमिदमब्रवीत्॥ **6.20.14** ॥

सर्वमुक्तं यथाऽऽदिष्टं रावणेन दुरात्मना।
तत् प्रापयन्तं वचनं तूर्णमाप्लुत्य वानराः॥ **6.20.15** ॥

प्रापद्यन्त तदा क्षिप्रं लोप्तुं हन्तुं च मुष्टिभिः।
सर्वैः प्लवङ्गैः प्रसभं निगृहीतो निशाचरः॥ **6.20.16** ॥

गगनाद् भूतले चाशु प्रतिगृह्यावतारितः।
वानरैः पीड्यमानस्तु शुको वचनमब्रवीत्॥ **6.20.17** ॥

न दूतान् घ्नन्ति काकुत्स्थ वार्यन्तां साधु वानराः।
यस्तु हित्वा मतं भर्तुः स्वमतं सम्प्रधारयेत्।
अनुक्तवादी दूतः सन् स दूतो वधमर्हति॥ **6.20.18** ॥

शुकस्य वचनं रामः श्रुत्वा तु परिदेवितम्।
उवाच मावधिष्टेति घ्नतः शाखामृगर्षभान्॥ **6.20.19** ॥

स च पत्रलघुर्भूत्वा हरिभिर्दर्शितेऽभये।
अन्तरिक्षे स्थितो भूत्वा पुनर्वचनमब्रवीत्॥ **6.20.20** ॥

सुग्रीव सत्त्वसम्पन्न महाबलपराक्रम।
किं मया खलु वक्तव्यो रावणो लोकरावणः॥ **6.20.21** ॥

स एवमुक्तः प्लवगाधिपस्तदा
प्लवङ्गमानामृषभो महाबलः।
उवाच वाक्यं रजनीचरस्य
चारं शुकं शुद्धमदीनसत्त्वः॥ **6.20.22** ॥

न मेऽसि मित्रं न तथानुकम्प्यो
न चोपकर्तासि न मे प्रियोऽसि।
अरिश्च रामस्य सहानुबन्ध -
स्ततोऽसि वालीव वधार्ह वध्यः॥ **6.20.23** ॥

निहन्म्यहं त्वां ससुतं सबन्धुं
सज्ञातिवर्गं रजनीचरेश।
लङ्कां च सर्वां महता बलेन
सर्वैः करिष्यामि समेत्य भस्म॥ **6.20.24** ॥

न मोक्ष्यसे रावण राघवस्य
    सुरैः सहेन्द्रैरपि मूढ गुप्तः।
अन्तर्हितः सूर्यपथं गतोऽपि
    तथैव पातालमनुप्रविष्टः।
गिरीशपादाम्बुजसङ्गतो वा
    हतोऽसि रामेण सहानुजस्त्वम्॥ **6.20.25** ॥

तस्य ते त्रिषु लोकेषु न पिशाचं न राक्षसम्।
त्रातारं नानुपश्यामि न गन्धर्वं न चासुरम्॥ **6.20.26** ॥

अवधीस्त्वं जरावृद्धं गृध्रराजं जटायुषम्।
किं नु ते रामसान्निध्ये सकाशे लक्ष्मणस्य च।
हृता सीता विशालाक्षी यां त्वं गृह्य न बुध्यसे॥ **6.20.27** ॥

महाबलं महात्मानं दुराधर्षं सुरैरपि।
न बुध्यसे रघुश्रेष्ठं यस्ते प्राणान् हरिष्यति॥ **6.20.28** ॥

ततोऽब्रवीद् वालिसुतोऽप्यङ्गदो हरिसत्तमः।
नायं दूतो महाराज चारकः प्रतिभाति मे॥ **6.20.29** ॥

तुलितं हि बलं सर्वमनेन तव तिष्ठता।
गृह्यतां मागमल्लङ्कामेतद्धि मम रोचते॥ **6.20.30** ॥

ततो राज्ञा समादिष्टाः समुत्पत्य वलीमुखाः।
जगृहुश्च बबन्धुश्च विलपन्तमनाथवत्॥ **6.20.31** ॥

शुकस्तु वानरैश्चण्डैस्तत्र तैः सम्प्रपीडितः।
व्याचुक्रोश महात्मानं रामं दशरथात्मजम्।
लुप्येते मे बलात् पक्षौ भिद्यते मे तथाक्षिणी॥ **6.20.32** ॥

यां च रात्रिं मरिष्यामि जाये रात्रिं च यामहम्।
एतस्मिन्नन्तरे काले यन्मया ह्यशुभं कृतम्।
सर्वं तदुपपद्येथा जह्यां चेद् यदि जीवितम्॥ **6.20.33** ॥

नाघातयत् तदा रामः श्रुत्वा तत्परिदेवितम्।
वानरानब्रवीद् रामो मुच्यतां दूत आगतः॥ **6.20.34** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे विंशः सर्गः॥